# हरिवंशम् – भविष्यपर्व

नीलकण्ठव्याख्यानसमेतम्

अथ अष्टमोऽध्यायः

## कृतादियुगपरिमाणम्

वैशम्पायन उवाच

**चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम् ।**
**तस्य तावच्छती सन्ध्या द्विगुणा जनमेजय ॥ ३-८-१**

ज्ञानसाधनवैराग्यसिद्धये पुत्तिकादिवत् ।
ब्रह्मादेः क्षयितां वक्तुं युगमानमिहोच्यते ॥ १

चत्वारीति। तावच्छती चतुःशती द्विगुणा अष्टौ शतानि युगसंध्या। तस्यां पूर्वोत्तरयुगयोर्धर्मा मिश्रीभवन्तीत्यर्थः ।एतानि देवमानेन अष्टशताधिकानि चत्वारि सहस्राणि सौरमानेन साष्टाविंशतिसहस्री सप्तदशलक्षी वत्सराणां भवति। सावनमानेन तु प्रत्यब्दं पञ्च दिनानि पञ्चदश घटिका एकत्रिंशत्पलानि त्रींशदक्षराणि च वर्धन्ते। तान्यपि एकराशौ संवत्सरत्रयस्पृशि गुरौ लुप्तसंवत्सरैर्हीयन्ते

**तत्र धर्मश्चतुष्पादो ह्यधर्मः पादविग्रहः ।**
**स्वधर्मनिरताः सन्तो यजन्ते चैव मानवाः ॥ ३-८-२**

तत्रेति। धर्मपादाः तपः शौचं दय सत्यं तैर्विग्रहो विरोधः स्मयसंगमदानृतपादवतो यस्य स पादविग्रहोऽधर्मः। धर्मेण निरुद्धपादः इत्यर्थः। यद्वा सर्वं युगचतुष्पादमपि संध्यांशे

उत्तरयुगधर्मसम्क्रमात् पञ्चपादं भवतीति ध्येयं । *तेनाधर्मः पादविग्रहः ।*
*द्वाभ्यामधर्मपादाभ्यां त्रिभिर्धर्मो व्यवस्थितः*
इत्यादि ग्रन्थः ऋज्वर्थ एव । एवमपि संध्याय पादार्धस्यैव संक्रमात्सर्वं युगं सार्धचतुष्पादं स्यात् । इदमपि युगं तत्संध्ययोः कालबहुत्वाल्पत्वाभ्यां न युक्तं पादाधिक्योक्ते । पुराणान्तरविरोधादध्यात्मप्रकरणाच्चैवमिह प्रतीमः । फलाभिसंधिना रहितो हिंसाशून्यो धमः कृतम् । तत्सहितस्त्रेता । दंभेन कृतो द्वापरम् । धर्मलोपः कलिः । तत्र आद्ये फलेच्चाभावेऽपि कृतो धर्मः । *तदयथा आम्रे फलार्थे निर्मितेच्छाया गन्धः इत्यनुत्पदयेते । एवं धर्मं चर्यमाणमर्था अनुपदयन्ते* – इत्यापस्तम्बोक्तेः फलं ददात्येव । तत्र च हीनसम्पत्पुरुषो बहुसंपदमन्यं दृष्ट्वा स्वस्यानैश्वर्यं-मन्वानो दुःखभाग्भवतीति । कृतेऽप्यधर्मरूपं दुःखमस्तीत्युक्तं कृतेऽप्यधर्मः पादविग्रह इति कृत्स्नधर्माधर्मनिर्मूलनक्षमं तत्त्वज्ञानमेव सम्पादनीयमित्याशयेन ॥

**स्थिता धर्मपरा विप्रा राजवृत्तौ स्थिता नृपाः ।**
**कृष्यामभिरता वैश्याः शूद्राः शुश्रूषवस्तथा ॥ ३-८-३**

**सदा सत्यं तपश्चैव धर्मश्चैव विवर्धते ।**
**सद्भिराचरितं यच्च क्रियते ख्यायते च यत् ॥ ३-८-४**

ख्यायते उपदिश्यतेऽन्येभ्यः

**एतत्कृतयुगे वृत्तं सर्वेषामेव भारत ।**
**प्राणिनां धर्मबुद्धीनामपि चेन्नीचयोनिनाम् ॥ ३-८-५**

**त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते ।**
**तस्य तावच्छती संध्या द्विगुणा परिकीर्तिता ॥ ३-८-६**

त्रीणीति। षट्शताधिकत्रिसाहस्री त्रेतायुगमानम्। एवमुत्तरत्रापि ज्ञेयम् ।

द्वाभ्यामधर्मः पादाभ्यां त्रिभिर्धर्मो व्यवस्थितः ।
तत्र सत्यं च सत्त्वं च कृते सर्वं प्रवर्तते ॥ ३-८-७

त्रेतायां विकृतिं यान्ति वर्णा लौल्येन संयुताः ।
चातुर्वर्ण्यस्य वै कृत्यादयान्ति दौर्बल्यमाश्रिताः ॥ ३-८-८

धर्मलौल्येन धर्मफलस्पृहया अत एव चातुर्वर्ण्यस्य चतुर्वर्णधर्मस्य वैकृत्यात् वैकल्यात् ।

एष त्रेतायुगविधिर्विहितो देवनिर्मितः ।
द्वापरस्यापि या चेष्टा तामपि श्रोतुमर्हसि ॥ ३-८-९

द्वापरं द्वे सहस्रे तु वर्षाणां कुरुसत्तम ।
तस्य तावच्छती संध्या द्विगुणा परिकीर्तिता ॥ ३-८-१०

तत्राप्यर्थपरा विप्रा ज्ञानिनो रजसाऽऽवृताः ।
शठा नैष्कृतिकाः क्षुद्रा जायन्ते कुरुपुङ्गव ॥ ३-८-११

द्वाभ्यां धर्मः स्थितः पद्भ्यामधर्मस्त्रिभिरुत्थितः ।
विपर्ययं शनैर्यान्ति कृते ये धर्मसेतवः ॥ ३-८-१२

ब्राह्मण्यभावा नश्यन्ति तथास्तिक्यं विशीर्यते ।
व्रतोपवासास्त्यज्यन्ते द्वापरे युगपर्यये ॥ ३-८-१३

द्वापरे युगपर्यये द्वापरान्ते कलिसांकर्यात्व्रतादि त्यज्यत इत्यर्थः

तथा वर्षसहस्रं तु वर्षाणां द्वे शते तथा ।
संध्यया सह संख्यातं क्रूरं कलियुगं स्मृतम् ॥ ३-८-१४

तत्राधर्मश्चतुष्पादः स्याद्धर्मः पादविग्रहः ।
कामनिष्ठास्तमश्छन्ना जायन्ते तत्र मानवाः ॥ ३-३८-१५

नैवोपवासकृत्कश्चिन्न च साधुर्न सत्यवाक् ।
आस्तिको ब्रह्मवक्ता वा नरो भवति वै तदा ॥ ३-८-१६

अहंकारगृहीताश्च प्रक्षीणस्नेहबान्धवाः ।
विप्राः शूद्रसमाचाराः शूद्रास्त्वाचारलक्षणाः ॥ ३-८-१७

दूषकास्त्वाश्रमाणां च वर्णानां चैव संकराः ।
अगम्येष्वभिरंस्यन्ते वर्तन्त्येवं कलौ युगे ॥ ३-८-१८

एवं द्वादशसाहस्रं तदेकं युगमुच्यते ।
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ॥ ३-८-१९

मन्वन्तरमिति | एतावता कालेनैको मनुर्नश्यतीत्यर्थः

त्रय्यां चैव न संदेहो युगान्ते जनमेजय ।
दिव्यं द्वादशसाहस्रं युगं तु कवयो विधुः ।

एतत्सहस्रपर्यन्तं तदहो ब्राह्ममुच्यते ॥ ३-८-२०

अत्र मानमाह । त्रय्यामिति । *तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते* इत्यादौ वेदेऽपि जनस्य स्थावरादिब्रह्मान्तस्य क्षयित्वं दृश्यत इत्यर्थः । न सन्देहः । *यत्कृतं तदनित्यम्* इति व्याप्तेरित्यर्थः ।

ततोऽहनि गते तस्मिन्सर्वेषामिव देहिनाम् ।
शरीरनिर्वृतिं दृष्ट्वा लोकः संहारबुद्धिमान् ॥ ३-८-२१

शरीरनिर्वृत्तिं शरीरसुखासक्तिम् ।

देवतानां च सर्वेषां ब्राह्मणानां महीपते ।
दैत्यानां मानवानां च यक्षगन्धर्वरक्षसाम् ॥ ३-८-२२

ब्रह्मणो वेदस्य वेधसो वा । ब्राह्मणानां महीपते इति पाठः । ब्रह्मलोकस्तानां दहराद्युपास्यब्रह्मविदाम् ।

देवर्षीणां ब्रह्मर्षीणां तथा राजर्षिणामपि ।
किंनराणामप्सरसां भुजङ्गानां तथैव च ॥ ३-८-२३

पर्वतानां नदीनां च पशूनां चैव भारत ।
तिर्यग्योनिगतानां च सत्त्वानां मृगपक्षिणाम् ॥ ३-८-२४

महाभूतपतिर्देवः पञ्चभूतानि भूतकृत् ।
जगत्संहरणार्थाय कुरुते वैशसं महत् ॥ ३-८-२५

भौतिकसंहारमुक्त्वा भूतसंहारमपि निश्चाययति - महाभूतपतिरिति । पञ्चभूतानि वियदादीनि जगद्भौतिकं च संहरणार्थायैव कुरुते न पुरुषार्थाय । मशकादिवत् सर्ववस्तुनाशायैव जायते न क्वचित्किंचित्कस्यचित्सुखमस्तीत्यर्थः । अत एव महत् वैशसं बीभत्समेतदिति शेषः ।

**भूत्वा सूर्यश्चक्षुषी चाददानो**
**भूत्वा वायुः संहनन् प्राणिजातम् ।**
**भूत्वा वह्निर्दह्यते सर्वलोकान्**
**मेघो भूत्वा भूय एवाभ्यवर्षत् ॥ ३-८-२६**

वैशसत्वमेवाह - भूत्वेति । दिनावसाने हि भगवान् सूर्यो भूत्वा लोकानां चक्षुरादीनि मुष्णाति । ततो वायुर्भूत्वा प्राणान् मुष्णाति । ततो वह्निर्भूत्वा शुष्ककर्पूरकल्पांस्तान्निःशेषीकरोति । ततो मेघो भूत्वा वृष्ट्वा चैकार्णवं संपद्यते । एवं भूलये सति जलादीन्यपि ब्राह्मलये स्वस्वयोनौ लीयन्त इति बोद्धयम् । नष्टाकाश इत्याकाशान्तनाशस्योपक्रान्तत्वात् ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि
पुष्करप्रादुर्भावप्रश्नोत्तरे अष्टमोऽध्यायः

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि टीकायां अष्टमोऽध्यायः

Harivamsha Maha Puranam - Part 3 - Bhavi"sya Parva
iitranslated by G. Scaufelberger, schaufel@wanadoo.fr aaugust 22, 2008
Proof-read by K S Rmachandran, ramachandran_ksr@yahoo.ca
Malayalam electronic version with Nilakantha commentary by aa. Puru"sothaman, puru"su55@gmail.com
If you find any errors compared to Chitrashala Press edition, send corrections to A. Harindranath, harindranath_a@yahoo.com